दिनाङ्क: 19.03.2026

प्रात: - 06:55

अथ वार्ता:

केन्द्रीय-मन्त्रिमण्डल

केन्द्रीय-मन्त्रिमण्डलेन देशे शत-सङ्ख्याकानां प्लग् एण्ड प्ले इति औद्योगिकोद्यानानां विकासाय षष्ट्यधिक-षड्शताधिक-त्रयस्त्रिंशत्-सहस्रकोटिरूप्यकाणाम् आवण्टनेन सह भारतौद्योगिक-विकास-योजना अनुमोदिता। ह्य: मन्त्रिमण्डलस्य उपवेशनानन्तरं नवदिल्ल्यां वार्ताहरान् सूंसचयन् सूचनाप्रसारणमन्त्री अश्विनी वैष्णव: कथितवान् यत् अस्या: योजनाया: उद्देश्यं वर्तते विश्वस्तरीयौद्योगिकाधारभूत-संरचनाया: विकास: विनिर्माणक्षमताया: वर्धनं देशस्य विकास-वृत्तान्तस्य अग्रेवर्धनम् चेति।

लोकसभा

लोकसभया विंशति-षड्विंशति -विनियोग-विधेयकं-द्वि इति अनुमोदितम्। विधेयकमिदं वित्तमन्त्रिणा निर्मला सीतारमण् इत्यनया प्रस्तुतम् आसीत्। इदं विधेयकम् अस्य वित्तीय-वर्षस्य सेवायै भारतस्य सञ्चितनिधिद्वारा कतिपयधनराशीनां विनियोगम् अधिकृतकर्तुं प्रयासं करोति।

नवरात्र

अद्यारभ्यते चैत्रनवरात्रम्। अशेषदेशस्य श्रद्धालव: एतानि नवशुभदिनानि अत्युत्साहेन भक्त्या च आचरन्ति। नवदिवसीयास्य एतस्य उत्सवस्य आरम्भ: मन्दिरेषु प्रात: पूजार्चनाद्वारा जात:, यत्र बृहद्-सङ्ख्यायां श्रद्धालव: आशीर्वादग्रहणाय एकत्रिता: जाता:।

निर्वाचनायोग

निर्वाचनायोगेन उक्तं यत् असौ चतुर्षु राज्येषु असम-केरल-तमिलनाडु-पश्चिमबङ्गालेषु पुडुचेरी-केन्द्रशासितप्रदेशे च हिंसामुक्तं प्रलोभनमुक्तं च निर्वाचनेभ्य: आगामि -विधानसभा-निर्वाचनात् प्राक् पञ्चविंशति-लक्षाधिक-अधिकारीणां नियुक्ति: कृता।

भाजपा

भाजपादलस्य केन्द्रीयनिर्वाचनसमित्या: उपवेशनं नवदिल्ल्यां दलस्य मुख्यालये आयोजितम्। उपवेशने प्रधानमन्त्री नरेन्द्रमोदी, गृहमन्त्री अमितशाह:, रक्षामन्त्री राजनाथसिंह: भाजपाध्यक्ष: नितिन-नबीन: दलस्य अन्य-वरिष्ठनेतार: च सम्मिलिता: जाता:। इदम् उपवेशनम् पुडुचेरी इत्यत्र आगामि-विधानसभा-निर्वाचनेभ्य: प्रत्याशिनां नामानि अन्तिम-रूपं प्रदानाय आयोजितम्।

पश्चिमबंगाल

निर्वाचनायोगेन पश्चिमबङ्गाले प्राशासनिक-आरक्षक-अधिकारिणां मध्ये बृहत्परिवर्तनं कृतम्। आयोगेन एकादश-जनपदाधिकारिण: निष्कासिता:, ये जनपद-निर्वाचनाधिकारी-रूपेण अपि कार्य कुर्वन्ति स्म । कूचबहर, जलपाइगुड़ी, मुर्शिदाबाद, नादिया इत्येतेषां स्थालानां जनपदाधिकारिण: परिवर्तिता: सन्ति। इत: प्राक् डी.आई.जी. इति पदाधिकारिण: अपि निष्कासिता: आसन्। आयेगेन उक्तं यत् अयम् आदेश: तत्क्षणप्रभावेन प्रवृत्त: भवति अथ अधिकारिभ्य: अद्यावधि कार्यभारं स्वीकर्तुम्, अनुपालन-प्रतिवेदनं मध्याह्ने त्रिवादनं यावत् समर्पयितुं च निर्देश: अस्ति। यावत् एषा प्रक्रिया न समाप्यते तावत् अपसारितेभ्य: अधिकारिभ्य: निर्वाचनसम्बद्ध –कार्याणि न नियोजिता: भविष्यन्ति।

पीएम-कुवैत युवराज

प्रधानमन्त्री नरेन्द्रमोदी ह्य: कुवैतदेशस्य युवराजेन शेख सबाह अल-खालिद अल-हमद अल-मुबारक अल सबाह इत्यनेन सह पश्चिमैशियाया: परिवर्तित-स्थितौ दूरभाषमाध्यमेन संवादं कृतवान्। कुवैतदेशे भारतीयसमुदायस्य सुरक्षायै कल्याणाय च नैरन्तयैण समर्थनाय प्रधानमन्त्रिणा युवराजाय धन्यवाद: प्रदत्त:। श्रीमोदिना आगामि ईदपर्व आलक्ष्य कुवैतदेशस्य युवराजाय शुभकामना: प्रदत्ता: ।

राष्ट्रपति

भारतस्य राष्ट्रपतिपदासीना द्रौपदी मुर्मु: अद्य अयोध्याया: यात्रां करिष्यति। एषा उत्तरप्रदेशस्य त्रिदिवसीययात्रायाम् अस्ति। राष्ट्रपति: सर्वप्रथमं अयोध्यां सम्प्राप्स्यति तत: श्रीराम-जन्मभूमि-मन्दिरं गमिष्यति।

॥ **इति वार्ता:**॥